वैयाकरणसिद्धान्तकौमुदी

ॐ

अजन्तपुँल्लिङ्गप्रकरणम् (१७)

२१.०२.२०११

पुनरावर्तनम्

- इकारान्तः पुँल्लिङ्गः हरिशब्दः ।
- 'शेषो घ्यसखि' इति घिसंज्ञा । तत्प्रयुक्तानि कार्याणि –
  - आङो नाऽस्त्रियाम्
  - घेर्ङिति
  - अच्च घेः
- ह्रस्वान्तत्वप्रयुक्तानि कार्याणि ।
  - जसि च
  - ह्रस्वस्य गुणः
- विशिष्टं कार्यम् – ङसिङसोश्च ।

- इकारान्तः पुंलिङ्गः ‘सखि’ शब्दः ।
- सखिशब्दस्य घिसंज्ञा नास्ति, ‘शेषो घि-असखि’ इत्युक्तत्वात् ।
- सखि (सुँ) स्

२४८. अनङ् सौ (७.१.९३)

- पदद्वयम् ।
- 'अङ्गस्य' (६.४.१) इत्यधिक्रियते । 'सख्युरसम्बुद्धौ' (७.३.९२) इति पूर्णम् अनुवर्तते ।
- **सख्युः अङ्गस्य अनङादेशः स्याद् असम्बुद्धौ सौ परे ।**
- **'ङिच्च' (१.१.५३) इत्यन्तादेशः ।**
- सखि स्
- सख् अन् स् ('अनङ् सौ' इत्यनङादेशः)

२४९. अलोऽन्त्यात् पूर्व उपधा (१.१.६५)

- चत्वारि पदानि । अलः, अन्त्यात्, पूर्वः, उपधा ।
- संज्ञासूत्रम् । 'उपधा' इति संज्ञा विधीयते ।
- अन्त्याद् अलः पूर्वो वर्णः उपधासंज्ञः स्यात् ।
- सखन् स्
- स् अ ख् अ न् स्

२५०. सर्वनामस्थाने चासम्बुद्धौ (६.४.८)

- पदत्रयम् । सर्वनामस्थाने, च, असम्बुद्धौ ।
- 'अङ्गस्य' (६.४.१) इत्यधिक्रियते । 'ह्रलोपे पूर्वस्य दीर्घोऽणः' (६.३ १११) इत्यतः 'दीर्घः' इति, 'नोपधायाः' (६.४.७) इति सूत्रं च अनुवर्तते ।
- **नान्तस्य उपधायाः दीर्घः स्यात् असम्बुद्धौ सर्वनामस्थाने परे ।**
- सखन् अ न् स्
- सखन् आन् स् ('सर्वनामस्थाने चासम्बुद्धौ' – इति दीर्घः)

२५१. अपृक्त एकाल् प्रत्ययः (१.२.४१)

- पदत्रयम् । अपृक्तः, एकाल्, प्रत्ययः ।
- संज्ञासूत्रम् । 'अपृक्तः' इति संज्ञा विधीयते ।
- एकाल् प्रत्ययः यः सः अपृक्तसंज्ञः स्यात् ।
- सखान् स्

२५२. हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (६.१.६८)

- पञ्च पदानि । हल्-ङी-आप्-भ्यः, दीर्घात्, सु-ति-सि, अपृक्तं, हल् ।
- 'लोपो व्योर्वलि' (६.१.६६) इत्यतः 'लोपः' इति अनुवर्तते ।
- हलन्तात् परं, दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सु ति सि इत्येतद् अपृक्तं हल् लुप्यते ।
- सखान् स्
- सखान् ('हल्ङ्याब्भ्यः...' इति सुलोपः)
- सखा ('नलोपः प्रातिपदिकान्तस्य' – ८.२.७ – इति नलोपः)

- सखि (सुँ) स् (‘स्वौजसमौट्...’ – ४.१.२ – इति सुप्रत्ययः)
- सखन् स् (‘अनङ् सौ’ – ७.१.९३ – इति अन्त्यस्य अनङादेशः)
- सखान् स् (‘सर्वनामस्थाने चासम्बुद्धौ’ – ६.४.८ – इति उपधादीर्घः)
- सखान् (‘हल्ङ्याब्भ्यो दीर्घात्...’ – ६.१.६८ – इति सुलोपः)
- सखा (‘नलोपः प्रातिपदिकान्तस्य’ – ८.२.७ – इति नलोपः)

- ‘हल्ङ्याब्भ्यः’ किम्?
- ग्रामणीः
- ग्रामं नयति इति ग्रामणीः । ग्रामणी स् इति स्थिते ईकारस्य ङ्यन्तत्वाभावात् सुलोपो न ।

- ‘दीर्घात्’ किम्?
- निष्कौशाम्बिः
- निष्क्रान्तः कौशाम्ब्याः इति समासे, उपसर्जनत्वात् ‘कौशाम्बी’ इति ङ्यन्तस्य ह्रस्वः । अत्र ङ्यन्तत्वेऽपि दीर्घत्वाभावेन न सुलोपः ।

- अतिखट्वः ।
- खट्वाम् अतिक्रान्तः । अत्रापि उपसर्जनत्वात् 'खट्वा' इति आबन्तस्य ह्रस्वः । दीर्घाभावेन सुलोपो न ।

- 'सु-ति-सि' इति किम्?
- अभैत्सीत् ।
- भिद् धातोः लुङ् लकारे 'अ भिद् स् ई त्' इत्यत्र अपृक्तः सिच् प्रत्ययः । तिपा सहचरितस्य सिपः ग्रहणात् सिचः ग्रहणं नास्ति । तेन इह लोपो न ।

- ‘अपृक्तम्’ इति किम्?
- बिभर्ति
- भृधातोः लट् लकारे ‘बि भर् ति’ इति स्थिते हलन्तात् परत्वेऽपि प्रत्ययस्य अपृक्तत्वाभावेन लोपो न ।

- ‘हल्’ किम्?
- बिभेद ।
- भिद् ति
- भिद् (णल्)
- भिद् अ
- भिद् धातोः लिट्-लकारे ’भिद् ति’ इति स्थिते ‘परस्मैपदानां णलतुसुस्थलथुसणल्वमाः’ (३.४.८२) इति तिपः स्थाने णलादेशः । णलि णकारः, लकारश्च इत् । ‘अ’ इति अपृक्त एव शिष्यते । तस्य च स्थानिवद्भावेन ‘ति’ इति परिगणने हलः परत्वात् तस्यापि लोपः स्यात् ।

- ‘प्रथमहल्’ किम्?
- राजा
- राजान् स्
- हलः परत्वेन अत्र सुलोपः । ‘संयोगान्तस्य लोपः’ (८.२.२३) इत्यनेन सकारलोपे तु, तस्य असिद्धत्वात् ‘नलोपः प्रातिपदिकान्तस्य’ (८.२.७) इति नलोपः न स्यात् ।
- नलोपादिर्न स्यात्, संयोगान्तलोपस्य असिद्धत्वात् ।

- सम्बोधनप्रथमायां तु ‘अनङ् सौ’ (७.१.९३) इत्यस्य प्रवृत्तिर्नास्ति ।
- हे सखि स्
- हे सखे स् (‘ह्रस्वस्य गुणः’ – ७.३.१०८ – इति गुणः)
- हे सखे (‘एङ्ह्रस्वात् सम्बुद्धेः’ – ६.१.६९ – इति सम्बुद्धिलोपः)

- सखि औ

२५३. सख्युरसम्बुद्धौ (७.१.९२)

- पदद्वयम् । सख्युः, असम्बुद्धौ ।
- 'गोतो णित्' (७.१.९०) इत्यतः 'णित्' इति अनुवर्तते । 'अङ्गस्य' (६.४.१) इत्यधिक्रियते ।
- सख्युः अङ्गात् परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत् स्यात् ।
- ण् इत् यस्य सः णित् । यद्यपि सर्वनामस्थानेषु स्वतः णित्वं नास्ति, तथापि णिद्वद् भवन्ति इति अतिदेशः ।
- णित्त्वम् आश्रित्य यानि कार्याणि विहितानि, तानि इह प्रवर्तन्ते इत्यर्थः ।

२५४. अचो ञ्णिति (७.२.११५)

- पदद्वयम् । अचः, ञ्णिति ।
- 'मृजेर्वृद्धिः' (७.२.११४) इत्यतः 'वृद्धिः' इति अनुवर्तते । 'अङ्गस्य' (६.४.१) इत्यधिक्रियते ।
- ञिति णिति च परे अजन्ताङ्गस्य वृद्धिः स्यात् ।

- सखि औ ('सख्युरसम्बुद्धौ' – ७.१.९२ – इति णिद्वद्भावः)
- सखै औ ('अचो ञ्णिति' – ७.२.११५ – इति वृद्धिः)
- सखायौ ('एचोऽयवायावः' – ६.१.७८ – इति आयादेशः)

- सखि (जस्) अस्
- सखि अस् (‘सख्युरसम्बुद्धौ’ – ७.१.९२ – इति णिद्वद्भावः)
- सखै अस् (’अचो ञ्णिति’ – ७.२.११५ – इति वृद्धिः)
- सखायस् (‘एचोऽयवायावः’ – ६.१.७८ – इति आयादेशः)
- सखाय (रुँ) र् (‘ससजुषो रुः’ – ८.२.६६ – इति रुत्वम्)
- सखायः (‘खरवसानयोर्विसर्जनीयः’ – ८.३.१५)

- सखायम्
- सखायौ